श्री कीलक स्तोत्रम्

Shri Keelak Stotram

Source: Sanskrit Wikisource — Keelak Stotram, revision 305048 (CC BY-SA 4.0). Also compared: Creative Commons Attribution-ShareAlike 4.0 licence; Internet Archive — Shri Durga Saptashati, Gita Press, 1952 first edition, PDF 24–25 (print check); Internet Archive — Shri Durga Saptashati, Gita Press large-type reprint, 1991, PDF 43–45 (second print check).

विनियोग और कीलक का स्वरूप

MANTRA

ॐ अस्य श्रीकीलकमन्त्रस्य शिव ऋषिः, अनुष्टुप् छन्दः, श्रीमहासरस्वती देवता, श्रीजगदम्बाप्रीत्यर्थं सप्तशतीपाठाङ्गत्वेन जपे विनियोगः।
ॐ नमश्चण्डिकायै॥

Oṃ Asya Śrīkīlakamantrasya Śiva Ṛṣiḥ, Anuṣṭup Chandaḥ, Śrīmahāsarasvatī Devatā, Śrījagadambāprītyarthaṃ Saptaśatīpāṭhāṅgatvena Jape Viniyogaḥ |
Oṃ Namaścaṇḍikāyai ||

SHLOKA 1

मार्कण्डेय उवाच

ॐ विशुद्धज्ञानदेहाय त्रिवेदीदिव्यचक्षुषे।
श्रेयःप्राप्तिनिमित्ताय नमः सोमार्द्धधारिणे॥

Oṃ Viśuddhajñānadehāya Trivedīdivyacakṣuṣe |
Śreyaḥprāptinimittāya Namaḥ Somārddhadhāriṇe ||

SHLOKA 2

सर्वमेतद्विजानीयान्मन्त्राणामभिकीलकम्।
सोऽपि क्षेममवाप्नोति सततं जाप्यतत्परः॥

Sarvametadvijānīyānmantrāṇāmabhikīlakam |
So'pi Kṣemamavāpnoti Satataṃ Jāpyatatparaḥ ||

SHLOKA 3

सिद्ध्यन्त्युच्चाटनादीनि वस्तूनि सकलान्यपि।
एतेन स्तुवतां देवी स्तोत्रमात्रेण सिद्ध्यति॥

Siddhyantyuccāṭanādīni Vastūni Sakalānyapi |
Etena Stuvatāṃ Devī Stotramātreṇa Siddhyati ||

SHLOKA 4

न मन्त्रो नौषधं तत्र न किञ्चिदपि विद्यते।
विना जाप्येन सिद्ध्येत सर्वमुच्चाटनादिकम्॥

Na Mantro Nauṣadhaṃ Tatra Na Kiñcidapi Vidyate |
Vinā Jāpyena Siddhyeta Sarvamuccāṭanādikam ||

शिव द्वारा कीलन और निष्कीलन

SHLOKA 5

समग्राण्यपि सिद्ध्यन्ति लोकशङ्कामिमां हरः।
कृत्वा निमन्त्रयामास सर्वमेवमिदं शुभम्॥

Samagrāṇyapi Siddhyanti Lokaśaṅkāmimāṃ Haraḥ |
Kṛtvā Nimantrayāmāsa Sarvamevamidaṃ Śubham ||

SHLOKA 6

स्तोत्रं वै चण्डिकायास्तु तच्च गुप्तं चकार सः।
समाप्तिर्न च पुण्यस्य तां यथावन्नियन्त्रणाम्॥

Stotraṃ Vai Caṇḍikāyāstu Tacca Guptaṃ Cakāra Saḥ |
Samāptirna Ca Puṇyasya Tāṃ Yathāvanniyantraṇām ||

SHLOKA 7

सोऽपि क्षेममवाप्नोति सर्वमेवं न संशयः।
कृष्णायां वा चतुर्दश्यामष्टम्यां वा समाहितः॥

So'pi Kṣemamavāpnoti Sarvamevaṃ Na Saṃśayaḥ |
Kṛṣṇāyāṃ Vā Caturdaśyāmaṣṭamyāṃ Vā Samāhitaḥ ||

SHLOKA 8

ददाति प्रतिगृह्णाति नान्यथैषा प्रसीदति।
इत्थंरूपेण कीलेन महादेवेन कीलितम्॥

Dadāti Pratigṛhṇāti Nānyathaiṣā Prasīdati |
Itthaṃrūpeṇa Kīlena Mahādevena Kīlitam ||

SHLOKA 9

यो निष्कीलां विधायैनां नित्यं जपति संस्फुटम्।
स सिद्धः स गणः सोऽपि गन्धर्वो जायते नरः॥

Yo Niṣkīlāṃ Vidhāyainām Nityaṃ Japati Saṃsphuṭam |
Sa Siddhaḥ Sa Gaṇaḥ So'pi Gandharvo Jāyate Naraḥ ||

SHLOKA 10

न चैवाप्यटतस्तस्य भयं क्वापीह जायते।
नापमृत्युवशं याति मृतो मोक्षमवाप्नुयात्॥

Na Caivāpyaṭatastasya Bhayaṃ Kvāpīha Jāyate |
Nāpamṛtyuvaśaṃ Yāti Mṛto Mokṣamavāpnuyāt ||

आरम्भ और फल

SHLOKA 11

ज्ञात्वा प्रारभ्य कुर्वीत न कुर्वाणो विनश्यति।
ततो ज्ञात्वैव सम्पन्नमिदं प्रारभ्यते बुधैः॥

Jñātvā Prārabhya Kurvīta Na Kurvāṇo Vinaśyati |
Tato Jñātvaiva Sampannamidaṃ Prārabhyate Budhaiḥ ||

SHLOKA 12

सौभाग्यादि च यत्किञ्चिद् दृश्यते ललनाजने।
तत्सर्वं तत्प्रसादेन तेन जाप्यमिदं शुभम्॥

Saubhāgyādi Ca Yatkiñcid Dṛśyate Lalanājane |
Tatsarvaṃ Tatprasādena Tena Jāpyamidaṃ Śubham ||

SHLOKA 13

शनैस्तु जप्यमानेऽस्मिन् स्तोत्रे सम्पत्तिरुच्चकैः।
भवत्येव समग्रापि ततः प्रारभ्यमेव तत्॥

Śanaistu Japyamāne'smin Stotre Sampattiruccakaiḥ |
Bhavatyeva Samagrāpi Tataḥ Prārabhyameva Tat ||

SHLOKA 14

ऐश्वर्यं यत्प्रसादेन सौभाग्यारोग्यसम्पदः।
शत्रुहानिः परो मोक्षः स्तूयते सा न किं जनैः॥ ॐ॥

Aiśvaryaṃ Yatprasādena Saubhāgyārogyasampadaḥ |
Śatruhāniḥ Paro Mokṣaḥ Stūyate Sā Na Kiṃ Janaiḥ || Oṃ ||

COLOPHON

इति देव्याः कीलकस्तोत्रं सम्पूर्णम्।

Iti Devyāḥ Kīlakastotraṃ Sampūrṇam |